॥१॥ श्रीसहजानंदाय नमः॥ अथ कविस्तस्यनाग्रादिसंक्षेपतो वर्णयति संप्रवर्त्तयितुमिति अथ सद्गुरोरौर्ध्वदैहिकक्रि
याकरणानंतरम् आर्त्तिजनानां त्रिविधपीडांसमयतिनिवर्त्तयतीतिसतथोक्तः सःसहजानंदः अत्रभूतलेऽस्मा
श्रयेणजनानांजीवानांमुक्तिरेकांतिकश्रेयस्तस्मै धर्मोवर्णाश्रमव्यवस्थयास्थितोत्रयस्तेनसहिताम् भक्तिं श्रवणं
कीर्त्तनंविष्णोः स्मरणंपादसेवनम्॥ अर्चनंवंदनंदास्यंसख्यमात्मनिवेदनमित्युक्तप्रकारेणनवविधभगवद्भज
नम् संप्रवर्त्तयितुंपर्य्यटन्संचरन्सन् अंबुधितीरेसागरतटेस्थितमितिशेषः मकरालयसंज्ञम् पुरंनगरम् आ

संप्रवर्त्तयितुमत्रसधर्मांभक्तिमार्त्तिनुत्तमनोतनमुक्त्यै॥ आययौसमकरालयसंज्ञंपर्यटन्पुरमथांबुधितीरे॥१॥
तस्थिवानिहद्वयश्रुतिगीतंतत्रसक्षितितलेवसुमासान्॥ ग्रामदंतनुभृदुद्धरणायस्वप्रियंप्रथयतिस्मतनार्थः

॥२॥ प्ययोसंप्राप्तः स्वागताख्यवृत्तम् लक्षणंतूक्तंप्राक्॥१॥ तस्थिवानितितत्रतस्मिन्मकरालयपुरेवसुमासान्व
सुसंख्ययाष्टमासास्तान् अष्टमासानित्यर्थः तस्थिवान् स्थितः जनैस्तत्रसभक्तैरत्यर्थोनिवासयितुंप्रार्थनीयः॥ स
सहजानंदः इहास्मिन् क्षितितलेभूमितलेतनुंदेहंबिभ्रतीतितनुभृतोजीवास्तेषामुद्धरणंसंसृतिदुःखान्मोचनं
तस्मैग्रामदंस्वालंबितसुखंददातीतितंतथोक्तम् स्वस्यात्मनःप्रियंरुचिकरम् श्रुतयोवेदास्तेगीतंवर्णाश्रमव्यव ॥१॥

स्थयाप्रोक्तम् स्वंधर्मम् प्रथयतिस्म विस्तारयामास॥२॥ तथेति बहूनजनान्स्वविद्याणनिगडेनानाविधकर्मकां
डेसितायेजीवास्तेषांपरिमोचनेत्रिविधदुःखनिवर्त्तकंतत्रालंसभावोयस्यसतथोक्तः ईशोवर्णाश्रमधर्मप्रवर्त्त
नसमर्थः एषसहजानंदः अत्रभूमौदैवाभवन्नीतोक्तयादैव्यासंपदायुक्ताः वद्धतःदैवैरसवत्ताक्तलिंगवि
भज्ञासक्तरगुरुप्रसंगात्स्वस्वधर्मभ्रष्टायेजनास्तेषांसमूहस्तन्नाताम् उपधर्मान्पाखंडधर्मान्मोचयितुंनि
वर्त्तयितुम् नास्तिप्रतिमानमुपमानंयस्यसतंतथोक्तम् स्वीयंनिजयसुरूपमैश्वर्यम् ततप्रदर्श्ययत्दर्शितवा

एषदैवजननतामुपधर्मात्त्रमोचयितुमप्रतिमान॥ वहज्जीवपरिमोचनशीलः स्वीयपोरुषमदर्श्ययदीशः॥३॥
तंचतुर्भुजमवेक्ष्यनरस्ते तत्रपूर्त्तकरणोन्मुखवर्ग ईशम्॥ विष्णुविग्रहधरं द्विजवाराश्चक्रुरुक्तकतराःश्रुतिमंत्रैः॥४

न् ॥४॥ नमितितत्रमकरालयपत्तनेपूर्त्तकरणं वापीनिर्माणविधिस्तस्मिन्मनमुखोमहस्तस्मिन्सति द्विजास्त
त्कर्मविधानायहूतान्नाब्रह्मणास्तेषांवाराः समूहाः ईशमात्मारामेमुक्तेरपिस्तुतम् तंसहजानंदम् विष्णोर्लक्ष्मी
नारायणस्यविग्रहोमूर्त्तिस्तस्यधरोधारकस्तंतथोक्तम् अतएवचत्वारोभुजावाहवोयस्यतंतथोक्तम् अवेक्ष्य
दृष्ट्वाउक्तकृतराञ्जलिहर्षाकुलाः संतः श्रुतिमंत्रैर्वेदमंत्रैः तस्यसहजानंदस्य अर्चापूजाम् चंदनपुष्पाद्युपचारैः

रितिनिर्घोषः चक्रुर्विदधुः यश्चतुर्भुजस्वरूपेणास्माभिरवलोकितः स एवायं वर्णिरूपधरः साक्षाद्भगवानिति निश्चित्य स्वु
॥२॥ रितिभावः॥४॥ तन्नुत्सवमिति तत्र तस्मिन्मकरालयपुरे ईश्वराः क्षराक्षरनियंतारः स सहजानंदः कृष्णो देवकीनंदनस्त
स्य या जनिर्जन्म तस्य वासरो दिनं जन्माष्टमी तिथिरित्यर्थः तस्मिन् अतिमहांतमुत्सवं महीयांसमहम् वादित्रनि
ध्वानपूर्वकमिति निर्घोषः विदधे चकार किंच तस्य सहजानंदस्यावलोकनं दर्शनं तस्मिन् लोलाः सतृष्णाः तस्य सह
जानंदस्य यस्य देवस्य चरणोऽब्जे कमले इव सुपमितसमासः ते एव शरणं नान्यन्मोक्षि दृणी येषां ते तथोक्ताः पु

उत्सवं स विदधे निमहांतं तत्र कृष्णजन्मनिवासरईश्वरः॥ आययुस्तदवलोकनलोलास्तत्पदाब्जशरणाः पुरुभक्ताः
५॥ कृष्णस्वरूपमवलोक्य जनेष्टं तं तदाप्रभृति लब्धमुदस्ते॥ विस्मिताः क्षवि विद्धुर्भगवंतं भेजुरेव दृढमाश्रयमाप्ताः

६॥ रुभक्ता वक्रभक्तजनाः तत्र पुरे आपयुराजग्मुः॥५॥ कृष्णस्वरूपमिति ते तत्र पुरे समागताः भक्ताः हरिजनाः
जनानां इष्टं प्रेमास्पदभूतम्॥ तं सहजानंदम् कृष्णस्य वसुदेवापत्यस्य यद्रूपं मयूरबर्हमौलिमकराकृतिकुंडलादि
मंडितद्विभुजमुरलीधरमूर्तिस्तद्रूपं परं तं तथोक्तम् अवलोक्य वीक्ष्य विस्मिताः साश्चर्याः लब्धमुदः प्राप्तपर
मानंदाश्च संतः तदाप्रभृति तद्दिनमारभ्य मनसि तं सहजानंदं भगवंतं साक्षात्षडैश्वर्यसंपन्नपुरुषोत्तममेव स्व ॥३॥

विविदुः स्वतरां जानंति स्म दृढं स्थिरं कदाचिन्महापद्युप्यस्पस्मानमिति भावः आश्रयं शरणम् आप्ताः संतस्ते त
न्भेजुः सिषेविरे॥६॥ पावनमिति स सहजानंदः जगत्सांभूमौ स्वेक्षणेन स्वदर्शनेन नितांतमतुलामनोहरत्वात्कमनीय
या या मूर्तिर्निजस्वरूपं तया आम् जना जीवास्तेषां समूहास्तन्नामामिंद्रियाणि तेषां वृत्तयः स्वस्वविषयप्रवर्तनस्व
भावास्तत्संरोधनात् स्थिरीकरणाद्धेतोः पावनं श्रोत्र जनपवित्रकरम् अतिमंगलमूलम संतत जनश्रेयोनिदानम्
स्वप्रतापं निजमहिमानम् प्रथयति स्म विस्तारयामास॥७॥ अत्रैतत्किल तत्रास्मिन् इंद्रियवृत्तिनिरोधे मनोरियंमा

पावनं प्रथयति स्म जगत्सांस्वप्रतापमतिमंगलमूलम्॥ स्वेक्षणेन जनमानसवृत्तिनिरोधनात्स नितमंतुलमूर्त्या॥७
अत्र मानवतनोरधिकारो नास्ति चास्य मनसीति वितर्के॥ तस्य नाभवदिलांबुधरस्य जीवनाख्यमनिरतस्य तपांते॥८

न वीतस्येदमिसणादिद्रुाणजिसाद्दिनाडी पृ मातुनुर्विग्रहो यस्य यज्ञा मनोरपसंमानवत्तस्य तनुर्यस्य ब्राह्मणार
माणवेति द्वापकादर्पसंयण प्राप्तमनुष्यदेहस्येत्यर्थः अस्य जनस्य अधिकारो योग्यतास्ति अस्य च जनस्य नास्ती
त्येवं जीवानामप्यच्छुमर्मम क्षवविधानं तस्मिन् निरतस्य प्रीतिमतः तस्य सहजानंदस्य तपस्यग्रीष्मर्तोरंते प्रावृषि॥
अंबुदस्य मेघस्येव मनसि चित्ते वितर्क ऊहो न अभवन्नासीत् सर्वजनत्राणं निविधित्सोरंबुधरस्य यथा स्वक्षेत्रे वर्षे

येनाप्यचक्षुस्तेत्रैरितिविषमत्वं नघटतीयतेतथासंख्यजननिर्वाणविकीर्णोस्तस्यसमाधिविधापतेःयमधिकृतोऽन
धिकृतोवेति विषमत्वंनासीदित्यर्थः॥८॥ योषितामिति इहभूतलेस्वस्यात्मनेइमेचारुणी कंदर्पेचरणेपादावंबु
जेइवेत्युपमितसमासः तेभजंतिअनन्यतयासेवंतेइतितेतथोक्तास्तेषाम् नृणांपुरुषाणाम् तथाभूतानांयो
षितांस्त्रीणांचयदिष्टफलंतेनलभ्यतेइतिफलभस्तथाभूतोनभवतीत्यफलभःस्वानुग्रहमृतेयोगाद्युपायैरपिदुष्प्रा
पः फलसमाधिः ज्ञोभायानोऽसंप्रज्ञाताख्योऽयंसमाधिःअभूद्बभूवतदातायोषितस्तुतेनरस्तुते पुमान्स्त्रियस्ते

योषितामिहनृणांफलसमाधिःस्वीयचारुचरणांबुजभाजाम्॥ यद्यभूदफलभःशुभकीर्त्तिस्तस्यदासमवलंबविद
धुस्ते॥९॥ आत्मदिव्यमहसापरिभूयतेतुमापमतवादिजनान्ये॥ लिप्सितांखलुतदिष्टफलाणांरूपतःसमदि
दृक्षितवीक्षाम्॥१०॥ कलोष्यः शुभामंगलकराकीर्त्तिर्यस्यतस्यतथोक्तस्य तस्यसहजानंदस्यदासंभृत्य
वसरिचर्यारूपभक्तेरष्टमंलक्षणम् विदधुश्चक्रुः॥९॥ आत्मेतिसमसहजानंदःतेतुंविवादैःपराभावयितुम् अ
प्राप्तनुपगतायेमतवादिनोभगवताकृष्णद्वैपायनेनसत्वशारीरकसूत्रद्वितीयाध्यायद्वितीयपादेनिरस्तानिरीश्व
रसांख्याचार्यकपिलादिमतानुगाजनाजीवास्तान् आत्मनःस्वस्यदिव्यमलौकिकंयन्महःप्रतापस्तेनपरिभूय॥ ॥३॥

सत्वा स्वीयनानाविधयुक्तियुक्तवचनततिभिर्विजित्यसतेभ्यइतितेभ्यःमतवादिजनेभ्यः लिप्सितांलब्धुमिष्टाम् तेषां
मतवादिजनानांयेइष्टफलरूपदेवास्तेषामूरूपतःस्वैः निजास्वीयायावीक्षादर्शनंताम् समदिशत्दत्तवान् खलुनिश्चि
तम् अत्रमतांतरीयजनानांश्रीसहजानंदविधापितस्वस्वेष्टदेवतादर्शनादिप्रसंगस्तुपृथग्वर्णनविशेषविस्तरस्त
कविवरश्रीनिर्गुणानंदविरचितसत्संगिजीवनाख्यप्रबंधादवगंतव्यः॥१०॥ तइतितेमतांतरीयजनाःतस्यसहजा
नंदस्यप्रतापमनन्यसाधारणैश्वर्यम् विलोक्यनिरीक्ष्यअतिविस्मितामसाश्चर्यंगताविचिन्त्यानिमनांसियेषां

तेविलोक्यशरणंदृढमासंस्तत्प्रतापमतिविस्मितचित्ताः॥ प्राप्यतस्यप्रकटीकृतमूर्त्तेर्धर्मसूनुरस्यतकुतर्कविमोहः
॥११॥ आगमस्मरणसंसृतिहारी कालवारणपिधिखेटमुदारः॥ तत्रयोगकलनाःसविचित्राःसप्रदर्शयदसंख्यज
नेभ्यः॥१२॥ तेतथोक्ताःसंतःप्रकटीकृतास्वेच्छयाप्रादुर्भाविताम्मूर्त्तिर्मानुष्यतनुर्येनतस्यतथोक्तस्यधृतदिव्य
नराकृतेरित्यर्थःतस्यसहजानंदस्य दृढंबलवत् कालादिभिरपिचालयितुमशक्यमितिभावःशरणंकरणत्राणंत्रि
भिस्तत्पदांभोजांतिकनिवासरूपंगृहम्प्राप्यधर्मसूनोस्तकौतुकस्य तोत्तदनुग्रहमतेब्रह्मादिभिरपिसकलमत्र्याशक्यो
योकुतर्कविमोहोतत्रकुतर्कोयःसर्वकारणकारणमक्षरपदाधिपतिःसर्वशक्तिःसाक्षात्पुरुषोत्तमोवासुदेवो

स्तिसएवायंनवेतिसंज्ञाय्यः विमोहोहोबाह्यतोभक्त्यारोपेनगुरुत्वाभासाक्रान्तजनप्रसंगान्मोक्षपथस्थस्थितिहेतु
भूतीदृग्रसलोलुपान्मज्जनेषुगुरुत्वबुद्धिरूपविपरीतज्ञानवतोयेस्तेतथोक्ताः आसन्बभूवुः ॥११॥ आ
गमदिति ॥ उदारोमहान्प्रणतास्वपुरतोनमनमात्रंहृत्वंतस्मिन्पांसंस्मृतिज्ञनिभृतिरिक्तः स्वहस्तीसेवंश्रीलः
ससहजानंदः कालवाणीअभिधानामयस्ससतथाभूतोयः खेटोग्रामस्तंतथोक्तम् आगमत् प्रापत् तत्र
तस्मिन्कालवाणीसंज्ञेग्रामेससहजानंदः असंख्यान्अगणितान्येजनास्तेभ्यः विचित्रान्अनेकविधाः यायोग
अंतरएसविदधेसकलेन्द्रियोगसाधनमविश्रितभक्तान् ॥ प्राप्तत्रार्मदस्समाधिविनिष्ठान्प्रेक्षणाक्षपितकल्म
षजालः ॥१२॥ साष्टांगस्यकलनायुक्तयस्ताः मर्दनीयत् दर्शयामास ॥१३॥ अंतरेतिसकलाः समग्राजीवा
स्तेषामीन्द्रोनियंताप्रेक्षणंकृपापूर्वककटाक्षेणावलोकनंतेनाक्षपितानिविनाशितानिजनानांकल्मषजा
लानिपापपुञ्जिलेस्यनात्मपापस्समूहयेनसतथोक्तः ससहजानंदः श्रिताः स्वाश्रयंप्राप्तायेभक्ताः अनन्यत
याभजमानाजनास्तान्योगस्यांष्टांगलक्षणस्यसाधनंयुक्ताहारविहारस्ययुक्तचेष्टस्यकर्मसुयुक्तस्वप्नाव
बोधस्ययोगोभवतिदुःखहेतिभगवद्गीतोक्ताहारादिनियमात्मकंप्रयासम् अंतरापिविनापिप्राप्तात्रार्मदा ॥४॥

सांसारिकत्रिविधतापोपद्रवमनलानामहृद्गम्यस्वपदात्समाधौस्वमूर्त्तिविषयचित्तवृत्तिनिरोधनेविशेषेणनि
ष्ठास्थितिर्येषांतांस्तथोक्तानविदधेचक्रे ॥१३॥ विष्णुयागमिति अथकालवाणीगमनानंतरम् ससहजानंदः
पिप्पलस्यग्रामस्यांतिकंनिकटंगतःप्राप्तायाउत्तमसिंधुसंज्ञस्वसारश्रेष्ठसरितस्तस्याउपकंठंसमीपमुत्प
लम्यप्राप्यविष्णुयागंवैष्णवमखम् अकरोत्व्यदधात् तत्रसलिलेहायनार्द्धंपण्मासमक्षितिदेवान्विप्रा
न् ॥ कष्टुक्षोभनानिभोज्यानिभोक्तुमर्हाणिचतुर्विधान्नानितैस्तथोक्तैः अतर्पयत् विशेषेणतर्पयामास ॥१४
विष्णुयागमकरोत्उपकंठपिप्पलांतिकगतोत्तमसिंधोः ॥ हायनार्द्धमुपलभ्यसुभोज्यैः समतर्पयदथक्षितिदे
वान् ॥१४॥ यानन्नूतनमहाधनवासः स्वर्णभूषणमुखानिसतेभ्यः ॥ संददिवेत्रापुरुहर्षयुतात्माप्रावृषीवसलि
लानिपयोदः ॥१५॥ यानीतिससहजानंदः पुरुहर्षैः भूरिविप्रतर्पणाद्भक्तानंदस्तेनयुतः सहितआत्मामनो
यस्यसतथोक्तः सन् पयोदोमेघः प्रावृषिवर्षाऋतौसलिलानिजलानीवतेभ्योभूदेवेभ्यः यानानिहयादीनि
चनूतनानिनवीनानिमहाधनानिबहुमूल्यानियानिवासांसिवस्त्राणिस्वर्णकनकंतस्यभूषणान्याभरणा
निचतानिमुखानिप्रभृतयोयेषांतानितथोक्तानिदेववस्तूनि संददिवेत्रासंददौ ॥१५॥

युग्मेनाहभूमेति निर्मदीकृतः स्वमदहेतुकलिसत्त्वेन ब्रह्मादिजयोत्सल्लगर्वोत्सकलब्रह्मांडेषु जनान् निजचापेन
पराभूय संचरतः कामस्य निजाश्रितजनेषु पराभवाभावान्निर्गर्वीकृतो मनोभवः कामो भूयोरजेतव्ययेन स तथोक्तः
स सहजानंदः इह भूतले स्वतनेभ्यः स्वाश्रितजीवेभ्यः निजा निस्तुल्या नियानियद्धा निधामानितेषु निषण्णा इति
शेषः अतिसिक्तैरतिस्निग्धैः पार्षदैः स्वस्वभृत्यैः पूजिता अर्चिताः विपुलाबद्धकांतिर्द्युतिस्तयापरिताश्रमाः

भूमविष्णुभुजगेंद्रनारायणानां देवकीतनुजनैः किल मूर्त्तौ ॥ पूजिता निजपदेषु नितांतैः स्वमदीहृताहिहस्वजनेभ्यः ॥१६
वासुदेवबदरीविपिनौकोऽपद्मपूरुषदिनेश्वरमूर्त्तौ ॥ पार्षदैर्विपुलकांतिपरीता निर्मदीकृतमनोभवभूप ॥१७॥
जीवमोक्षणगृहीततनूरीरः कश्चिदस्ति न परेण्यमधीन्द्र ॥ निर्णयं दृढमतो विदधुस्ते विस्मितास्तदनुभावमवेक्ष्य ॥१८

देवकीतनुजनैः श्रीकृष्णस्य भूमान्नयाकृतपदनिवासी भूमपुरुषश्च विष्णुर्वैकुंठवासी लक्ष्मीनारायणश्च भुजगेंद्रः
शेषस्तत्रत्रातेइति भुजगेंद्रश्चापश्च तेषाममूर्त्तौ तनूः स्वदीहृतान् विशेषणाद्दर्शयामास किल ननु वासुदेवः क्षीरसाग
रतर्वर्तिश्वेतद्वीपनिवासी च बदरीणां कर्कंधूनां विपिनं वनं बदरिकाश्रमस्तदेवौको वसतिस्थानं यस्य स नरनारायण
इत्यर्थः स च यज्ञपुरुषो यज्ञमूर्त्तिर्भगवांश्च दिनेश्वरः सूर्यश्च तेषां च मूर्त्तयस्ता अपि स्वदीहृतान् ॥१६॥१७॥ जीवेति ॥५॥

जीवानां यः मोक्षणं जनिमृति निवृत्तिस्तदर्थं गृहीतं तनूः शरीरं मानवतनुर्येन स तथोक्तः अयं सहजानंदः अधी
न्द्रः क्षराक्षरनियंता सर्वकारणकारणं साक्षात्पुरुषोत्तम एवास्ति नकृतो ऽस्मादन्यः परः तत्त्वतः सहजानं
दात् कश्चित्कोऽपि परः सर्वकर्मणां कारणत्वेन सर्वांतर्यामित्वेन वास्तीति संबंधः इति तस्य सहजानंदस्यानुभावम
पूर्वप्रतापम् अवेक्ष्य दृष्ट्वा विस्मिताश्च साश्चर्यं गतास्ते भक्तजनाः इदं देशकालादिवैषम्येऽपि कैश्चिज्ज्ञातुमपि तुम
शक्यमित्यर्थः निर्णयं निश्चयम् विदधुश्चक्रुः ॥१८॥ प्राप्येति ते भक्ताः साधनमृते ऽपि भगवत्तस्येति शेषः स

प्राप्य साधनमृतेऽपि समाधिं ते विलोक्य ययुरीक्षणगम्यम् ॥ तं गतास्फधमनिप्रतिरोधास्तत्र विस्मयमनर्घ्यं
निसर्गम् ॥१९॥ हजानंदस्ते चित्तवृत्तिनिरोधाय अष्टांगयोगाद्युपायेषु युक्ताहारादिनियमलक्षणश्रया
संविनापि तस्येति शेषः ॥ सहजानंदस्य ईक्षणं दयार्द्रदृष्ट्यावलोकनं तेन गम्यं प्राप्यम् समाधिं तन्मूर्त्तौ चित्त
वृत्तिनिरोधम् प्राप्य गतः प्राप्तः असूनां प्राणानां धमनीनां नाडीनां च प्रतिरोधो निरोधनं येस्ते तथोक्ताः संतः
तत्र तस्मिन्समाधौ अनर्घ्यः कोटिसाधनैरपि प्राप्तुमशक्यत्वादमूल्यो निसर्गः स्वभावो यस्य तं तथोक्तम् तं सह
जानंदम् विलोक्य निरीक्ष्य विस्मयमाश्चर्यम् ययुः प्रापुः ॥१९॥ कश्चिदिति अत्रास्यां भुवि कश्चित्कोऽपि तरुर्महा

न्योयत्नः प्रयासस्तस्मात् महता समयेन चिरकालेन योगस्याष्टांगलक्षणस्य सिद्धिं ध्येयादौ चित्तवृत्तिनिरो
धादिरूपाम् उपयाति प्राप्नोति ताह्रक्षीं चिरकालगम्याम् तामष्टांगयोगसिद्धिम् नराः पुरुषाः गृहिणोयोषा
श्च तस्य सहजानंदस्य यात्रूपात् यार्दृष्टिरेव बलं सामर्थ्यं येषां ते यासां ता वेति विग्रहे पुमान् स्त्रिये सेकत्रोषे पुमा
नेव त्रिष्वितेने षां भाव स्तत्ता तयैव प्रपुः प्रापुः ॥२०॥ वर्ज्जनइति इहलोके तं सहजानंदम् उपेताः प्राप्ताः तया

कश्चिद्दत्र महता समयेन योगसिद्धिमुपपात् पुरुयत्नात् ॥ तद्रूपावलतयैव प्रपुस्तां ताह्रक्षीं भुविनराश्च गृहि
ण्यः ॥२१॥ वर्जनेः स्त्रयमने चिरकालं धारणेत्व वपुषां च युवानः ॥ प्रापुरात्मवन्नृताम् इह दृष्ट्वा देहिनो विनिश्चावस्त
मुपेताः ॥२२॥ स्त्रस्थिरो यदि विलोक्यजनानामीयुषां युगपदेव समाधिः ॥ ते भिरे हि बहवस्तनुभाजो विस्मयं तदव
लोकनमात्रात् ॥२३॥ प्राप्ताः युवानस्तरुणाः वृद्धाः स्थविराश्च स्त्रियानोबालाः अपि देहिनो मनुष्याः स्वेषामात्मनां
यानि वपूंषि देहास्तेषां तथोक्ता नाम् वर्जने प्रहाणे चिरकालं न कुकालं पश्चात्तथा धारणे धृतौ च स्त्रयमने
प्राणनिरोधे च आत्मवन्नृताम् स्वतंत्रताम् प्रापुः ॥२१॥ स्त्रस्थिर इति ईयुषां तच्छरणं प्राप्तानां जनानां जीवानाम् त
स्य सहजानंदस्यावलोकमात्रान्निरीक्षणादेव यदि स्त्रस्थिरश्चिरकालस्थायी समाधिस्तन्मूर्त्तौ चित्तवृत्तिनिरोधः ॥६॥

युगपदेकैककालमेव अभूदिति निर्णयः तदा विलोक्यतद्दृष्ट्वा वाक्यार्थः कर्मबहवोऽसंख्याः तनूं देहं भजंतीति
तनूभाजो देहिनः भजेर्ण्विरिति ण्विः वेरपृक्तस्येति वेर्लोपः विस्मयमाश्चर्यम् लेभिरे प्रापुः हि निश्चितम् ॥२२
दीर्घेति इन्नो विश्राणितेति वेभ्यो जने भ्यो भवसागरस्य संसारसमुद्रस्य पारे एव सर्मयेन स तथोक्तः विपुले वि
शाले चंचले च पले चनेत्रे चक्षुषी यस्य स तथोक्तः स सहजानंदः इह समाधौ दीर्घं कालं चिरकालं निभृतानिश्च
लास्थितिरवस्थानं तां भजंतीति विभ्रतीति तथोक्तास्तेषाम् नृणां पुंसाम् तथाभूतानां योषितां स्त्रीणां च आव

दीर्घकालनिभृतस्थितिभाजां योषितामिह नृणां मचचक्षे ॥ आवलीर्विपुलचंचलनेत्रः प्रत्तवीभवसागरपारः
२३ ॥ स्वस्तिके समुपविश्य च भद्रे वाज्ञनास्तिक इति चिह्नरूपके ॥ आसने वहितनिर्मलचित्ताः तस्य दांबुजरताः क्रति
नीरे ॥२४॥ दध्युरिष्टमतुलमूर्ण येन प्रस्तरस्थिरतरात्मनारीराः ॥ नस्मतसरसमन्तर्मविपक्ता निःसरंसपितत क्षण
मात्रम् ॥२५॥ ली: पंक्तीः च चक्षे ददर्श अयं दर्शने पि पाति भट्टोजिदीक्षितोक्त्यनुरोधाच्च क्षिङो दर्शने पि दृत्तिः ॥२३
युग्मेनाह स्वस्तिकइति आवहितं तद्ध्याने सावधानं निर्मलं विषयरागजन्यपापरहितं च चित्तमंतःकरणं येषां ते
तथोक्ताः क्रति विशिल्के विजन्क्ताः स्वस्तिके स्वस्तिकाख्ये आसने विशिष्टे समुपविश्य उपनिपद्य क्रतिविजन्क्ताः भद्रे

केचिद्भक्ताः व्रजनानिकिशि(?)रख्ये ऽऽसने समुपविश्य केचिद्भक्ताः कूर्मेभ्यस्य संप्रत्याख्यमासनं तस्मिन् समुपविश्य
भद्राख्ये ऽऽसने च समुपविश्य कतिकेचिच्च भक्ताः वीरे वीराख्ये ऽऽसने समुपविश्य स्वस्वाः पाषाणा
इव स्थिरतराः एपतिहृद्गानि ऽऽत्मव्राही रागिष्वदेहायेषां ते तथोक्ताः तस्य सहजानंदस्य पदे चरणे ऽऽम्बुजेपद्मे
इवेसुपमितसमासः तत्ररताः प्रीतिमंतश्च संतः न विद्यते तु लोपमा यस्य तथा भूतो यः प्रणायः प्रीतिस्तेन दृष्टुं प्रेम
एपदं भूतं सहजानंदम् दध्युर्ध्यातवंतः तस्मिन् ध्याने यस्य रमत्रार्भ सर्वो त्कृष्टरूकं स्वतत्र विपक्षाविज्ञोषेणासक्ताः॥
ते सर्वे भक्ताः ततस्तस्माद्ध्यानात् क्षणमात्रमपि न निःसरं तिस्म न बहिरागमुः स्वस्तिकाद्यासनलक्षणमुक्तं

ध्यानतः सल्लघुनामहृतावादियत्रार्भक्त लधिः समयेनारीणाहूषणसदंतस्वासो वीक्षणादिभिर्जागरयन्तान्॥
३६॥ तानंदैनकविराजेन तान्वोरंतरे पादतले कृपापियोगकृत् कृत्वासीत कृत्तुर्य भत्स्वस्तिकं परिकीर्त्तितम् सीवनी
पार्श्वयोर्गुल्फौ कृषणाधः क्रमान्न सेत् दध्यात्माद्याच्च पादो भ्योमितिभद्रासनं परम् निपीड्य सीवनी नामपार्ष्णि
नावामगुल्फकं विमसेद्दक्षिणं गुल्फमेतत्सिद्धासनं स्मृतम् ॥ आसनानां च रोगघ्नमेतद्वज्रासनं विदुः ॥ केचिन्मु
क्तासनं प्राकुरे केगुप्तासनं जगुः॥ वामेरो दक्षिणं पादं दक्षोरौ मस्यचेतरम्॥ अपाकूराभ्यामगुष्ठे दध्यात्सयास्नं
लितम् न्यसेद्वैपादमेकमूरूममपदे तथा वीरासनमितिप्रोक्तमकरं साधकैर्दिदमिति॥ ३७॥ ३८॥ ध्यानतदृति ॥७॥

रीणानि नष्टानि हूषणानि कामादिदोषयस्मान्तथा भूतं यत्स्मतं साधुपुरुषाणां मंतरा चिन्तं तत्र वासो निवसनं
यस्य सतथोक्तः दिव्यमपारूतं यत्क्लीक्क स्वतंत्र तलधिरब्धिः सस सहजानंदः लघुनाऽल्पेन महता दीर्घेणवा
समयेनकालेन तान्भक्तान् ध्यानतः समाधितः समाधिर्नासमर्थने ध्यानवीवाक्क नियमेकाव्यस्य वगुणान्तरे
इति मेदिनी वीक्षमाणप्रवलोकनमादि र्येषां करसंज्ञासंकल्पादीनां तैस्तथोक्तैः अजागरयद्वोधयत्॥ ३६
श्रोत्रिति अथ जागरणानंतरम् ते ध्यानात्त्वागरिता भक्ताश्रोतारस्तत्कृत्कवार्त्ताश्रवणकर्त्तारो येजनास्तेषां वि

श्रोतृविस्मय विधाप्यथ चक्रुर्वर्णनं हि पुरुषोत्तमधाम्नाम्॥ निर्त्तरेश्वरविचित्रपदानां नैकलोकरचनाम वदंस्ते॥ ३७
केचिदाकुरज विद्भुभवानां कर्मणां प्रकृतिजस्थपतीनाम्॥ उद्भवस्थितिलयाधिकृतानां विस्मयास्पदमुदंतमनमाः
३८॥ स्मयमाश्चर्यं येविदधाति करोतीति तन्तथोक्तम् पुरुषोत्तमस्य नृनाटकं धृतवतः सहजानंदस्य भगवतो धाम्नां वैकुं
वादिस्थानानाम् वर्णनं तत्त्वतो निरूपणम् चक्रुर्विदधुः हि निश्चितम् निर्जरा देवास्तेषामीश्वरा इंद्राद्यस्तेषां या
नि विचित्राणि नानाविधानि पदानि स्थानानि तेषाम् वर्णनम् चक्रुः न कैनैके न अर्थे न त्रात्रे न स्वरूपकल्पयेति समासः
ते च ते लोका भुवनानि च तेषां रचना निर्माणप्रकारम् अवदन्नूजगदुः॥ ३७॥ केचिदिति निचित्सुते ऽस्मन्ना आश्रयणी

 योये यां तेन तथोक्ताः केचिदपरे भक्ताः प्रकृति तं मायो सर्वभुवनं तस्याधिपतयो ऽधिपतयस्तेषां तथोक्ताः नामृतज्ञ 
वनसन्निस्थस्थितिः पालनं वलयो नान्याश्च तेषुका अधिकृताः अधिकारवंतस्तेषाम् अजोत्रस्ता च विष्णुश्च भवः
त्रिविष्टतेषां या नि कर्माणि जगदुत्पन्नवादीनि तेषाम् विस्मयपाश्चर्यम् तेषां मास्पदं स्थानम् उदंतं वार्त्ताम् उदं
तः साधुवार्त्तयोरित्यमरः आकूतेयद्युत्कर्मकुर्वेति ततत्तगदुरित्यर्थः ॥ २७ ॥ दध्युरिति कतिचित्केचिदपरेभ
क्ताः स्वहृदये ईक्षणो युग्मं नेत्रयुगलम् प्रतिरूपप्रतिलोमी हृस उदारं महांतम् पंकाः पापानि तेषां पूगाः सम्

दधुर्गात्मनहृदये प्रतिरूपश्रीहरिंकृति विदीक्षणयुग्मम् ॥ केचिदुज्झितनिमेषमुदारं पंकपूगनुत्परमं नयनाग्रे ॥
२८ ॥ एकमेव कमरं प्रतिरूपस्वीयमुन्मीलितं तं प्रणयंतः ॥ अमधुरस्मरणथिनोददृशुस्ते पावनं विनिमयेन तयोस्
म् ॥ २९ ॥ हास्तान्यप्रयतिविनान्युपतीतितं तथोक्तम् श्रीहरिं निरतिशयप्रभाविशिष्टं हरिनामानं सहजानंद
मुदध्युश्चिंतयामासुः केचिदपरे च भक्ताः तम् उज्झितस्त्यक्तो निमेषः पक्ष्मपातो यस्मिन् कर्मणि तद्यथा तथा
नयनयोर्नेत्रयोरग्रे पुरः दध्युः ॥ २९ ॥ एकमिति उदधिकं प्रणयः प्रेमभरोस्ति येषामिति तथोक्ताः ते ध्यातारो भ
क्ताः स्वीयमात्मीयम् एकम् अबकं चक्षुः अरमं संतम् प्रतिरूपप्रतिलोमी हृस अमदपरं चक्षुः उन्मीलित ॥ ८ ॥

तं या कोन्यानं निर्निमेषतामितिया वत् प्रणयंतः प्राप्नुवंतः संतः पावनं जगास वितारम् तं सहजानंदम् ददृशुः
च वक्षिरे तयोर्नेत्रयोः विनिमयेन वैपरीत्येन प्रथमं यद क्षिम्यांतर सन्मुखीकृतं तस्य बहिः स्मा निर्निमेषतया
प्रथ्याप्य पश्च निर्निमेषतया बहिःकृतं तस्यांतरसन्मुखीकृत्वेत्यर्थः तं ददृशुः ॥ ३० ॥ मेलनमिति अतिशयेन गु
रुः सकलजनहितोपदेशा सहजानंदः श्रिताः न्यासेणं प्राप्ताये जनास्तीवास्तान् असूनां प्राणानाम् धमनीनां
नाडीनां च मीलनं संकोचम् सविकाननच्छनिजां निरंतरम् समनिशिक्षत् सम्यक् शिक्षयामास एकत एक
मीलनं सम निशिक्षदसूनां सं विकाननाम निजां धमनीनाम् ॥ एकतः श्रितजनान कृती वा धारणाम वयवं समगरी
यान् ॥ ३१ ॥ येस्मृता समगमंस्तनुसंतो न स्मरंति खलु ते निजदेहान् ॥ अस्मभम्युपगतेषु न तेषां तेषु रूढगतिदा
हमनुयां ॥ ३२ ॥ सिक्तलयेनपादांगुष्ठेनाप्सुतां प्राणानां तीव्र स्पर्शेन द्रव्यस्य च धारणां समाधिना धृतिम् सम नि
शिक्षत्यस्यां स्पष्टोक्ष्येभोक्षितिविद्येयविशिक्षिता नेति भावः ॥ ३३ ॥ यदतियेतनुसंतो देहपातो भक्तजनाः तामुक्ति
विधां धारणाम् समगमन् संप्राप्ताः ते भक्ताः निजदेहान् स्वशरीराणि न स्मरंति स्मरनं स्मरुः खलु निश्चितम्
तेषु स्वदेहेषु रूढमोघ मोगतिर्वर्त्मयस्य सरूपमागतिरनलः रूपम वत्मा योनि विक्रेत्रा त्रपर्युध अश्रयान्यो दहन्ना

नुः हृत्वान्तुः पावकोनलद्दसमरः तस्यदाहोदधिस्तम् उपगतेषु प्राप्तेषु सत्सु तेषां दग्धांगानां भक्तानाम्
अस्यले लेश्मपि अन्तर्मध्ये दुःखम् नच भूवेतिन्योषः समाधौ भागवद्दर्शनादिसुखांबुधि निमग्नास्ते भक्ताबा
ह्यान्नित्तम देहदुःखं सुखं वा विविदुरिति भावः ॥२३॥ तेषिति अतर्क्याते श्रूयोदीयन्तया तर्कयितुं चिंत
यितुमशक्याविभूतयो ब्रह्मादयो यस्य सतथोक्तः समसहजानंदः मूलाधारादिषु षट्चक्रेषु मध्ये एकस्मि
न्नमतमे चक्रे कारितो विधापितो निजानामात्माश्रितभक्तजनप्राणानां निरोधः स्थिरीकरणं येषांतांस्त

तैः सचित्रनिनदश्रुतिमेकचक्रकारितनिजात्मनिरोधान् ॥ नानचीकरदतर्क्यविभूतिं प्रोस्थितैः प्रणवनिर्ण
यवार्त्ताम् ॥२२॥ पिंगलादिधमनी स्फुटमार्गैर्ध्यानमत्र जनतामभिशिक्षत ॥ भास्करेन्दुमुखनिर्जरलोकान् सस
तिःसकतिचिन्तयतिस्म ॥२४॥ तथोक्तान् तान् कांश्चित् तस्य भक्तान् चित्रनिनदस्य विधानाहतवाद्यध्वनेः श्रुतिं
श्रवणम् अचीकरत् अदीधपत् प्रोस्थितैः समाधेरुत्थापितैरसिमर्थैः तैर्निजभक्तैः प्रयोगैः प्रणवनिर्णयवा
र्त्तां प्रणवसंख्यावृत्तांतम् अचीकरत् विधापयामास ॥२२॥ पिंगलेति सतांसज्जनानां पतिः स्वामी समसहजानं
दः अत्रास्मिन् लोके जनाभक्तजीवास्तेषांसमूहस्तन्त्राताम् पिंगलासुषुम्नानाडी आदिर्मुख्यायासांतथाभूता ॥९॥

याधमन्योनाड्यस्तासांस्फुटाः प्रकाशमानायेमार्गाः पंथानस्तैस्तथोक्तैः करणैः ध्यानंस्वस्यैकैकांगचिंतनम्
अभिशिक्षत् न्यशिक्षयामास कतिचित्कांश्चिज्जनान् भास्करः सूर्यश्च इंदुश्चंद्रश्चतौ मुखे आदौ येषांतथाभूता
येनिर्जरादेवास्तेषांयेलोकाधामानितान् नयतिस्मप्रापयतिस्म ॥२४॥ इत्थमिति जनानांजीवानां मुक्त्यैनिर्वाणा
यभूतलेभूमौ आगताग्गृहीतान् तनुर्मानुषदेहोयेनसतथोक्तः अतो ब्रह्मादिर्येषांदेवानां तेषां नियंतास्वस्वा
धिकारेप्रवर्त्तनसमर्थे सकलाः समस्तायायोगस्याष्टांगलक्षणास्य कलास्तदभ्यासयुक्तयस्तासामीशास्तस्वा

इत्थमात्तनृतनुर्जनमुक्त्यैभूतलेसकलयोगकलेशः ॥ तात्मशिक्षयदजादिनियंतासश्रितानहृतसाधनयत्नान्
॥२५॥ सिद्धतामुपगताभुवितस्यसज्जनैः स्मदययाप्चितस्य ॥ येजनाः परतनुष्वपिसद्यस्तेप्रविश्यविदुरिंगितजा
तम् ॥२६॥ निहितासनत्वादधिपतिः समसहजानंदः नहृतोनानुष्ठितः साधनानांतत्कलाहेतुभूतोपायानांयत्नः प्र
यासोयैस्तांस्तथोक्तान् श्रितानशरणीभूतान् भक्तजनान् अशिक्षयत् विनोष्ठेनाशिक्षयामास ॥२५॥ सिद्धतामि
ति भुविपृथिव्याम् संतः निष्ठधर्मेनिरताः साधुपुरुषास्तेजनानांतद्वितरनरास्तेस्तथोक्तैः आपचितस्यपूजित
स्यतस्यसहजानंदस्यदयया निरतिशयपुरुषार्थप्रदया येजनाभक्तजीवाः सिद्धतामष्टांगयोगफलभूतानि

माद्यष्टसिद्धिमुपगताः प्राप्ताः ते भक्तजनाः परेषां स्वातिरिक्तजनानां तनुषु देहेषु सद्यः शीघ्रं प्रविश्य इंगितानि त
द्गताभिप्रायाः इंगितं हृद्गतो भावो बहिराकारस्त्वाकृतिरितिसज्जनः तेषां ज्ञातं समूहम् ज्ञातं ज्ञानिसमूहयोः
रितित्रिकाण्डस्मृतः विदुर्ज्ञातवंतः इतिसम्बन्धः ॥३३॥ नद्धति अमी एषां जनानां संबंधिनो यास्तनवो देहास्ताः स्थितिं स्थिरत्वं विनाशाय स्था
नम् आप्ताः गताः ते भक्तजनाः मंक्षु शीघ्रम् निजाः स्वकीया याः नाड्यः नाडीसमूहः प्राणाश्च तेषां निरोधं स्थिरी
करणम् प्रापितान् तान् स्वभक्तजनप्रविष्टान् अक्षभाजः प्राणिनः श्रीहरेर्निरस्तनिद्रायत्नाभाविनि एष जनसंस्मृ

तेः स्मदीयतनुषु स्थितिमाप्तान् मंक्षु तान्निजनाडीगणनिरोधम् ॥ प्रापितान् समनयत् अक्षभाजः श्रीहरिस्वकृतिद्वयपदा
नि ॥३४॥ आज्ञयास्तुलभमत्र समाधिं ते स्वं प्रति विभगवानिवतस्मात् ॥ संविधाप्य तनताः श्रुतकीर्तेः सद्गुरोः स्वयं जा
गरयंति ॥३५॥ तिनिवर्तनायातनूतनीः साक्षात् सुरूपीन्तमस्य सहजानंदस्य प्रकृतेर्मायायाः दूराणिपुराणियानि
पदानि वैकुंठादिस्थानानि समनयत् नुप्रापयत् ॥३६॥ आज्ञयेति अत्राणंभूमौ ते योगसिद्धतां गताभक्ता अपि श्रु
ताः आदिगंते पी विख्याता कीर्तिर्यत्नात्ययस्तस्य तथोक्तस्य सत्साधुषु मतिसद्धर्मे वासत्तिसद्धास्त्रे वारतिः प्री
तिर्यस्य तस्य तथोक्तस्य तस्य सहजानंदस्य आज्ञया जनतां जनसमूहम् भगवान् इनः स्वयं सहजानंदः अक्षभंगः ॥३७॥

प्रापम् समाधिं चित्तवृत्तिनिरोधम् संविधाप्य कारयित्वा तस्मात् समाधेः परिजागरयंति उत्थापयंति स्म देहानुसंधा
नवंतीं चक्रुरित्यर्थः ॥३८॥ अस्ततामिति संसृतिं जनानां तन्निमृतिच्छुः खं छिंदंति भिंदंती सेवं लीलानियानि चारूणि
सुंदराणि चरित्राणि लीलाय स्य सतथोक्तः यः सहजानंदः इह भूमौ समयेन चिरकालेन अस्ततां नष्टताम् गताः प्रा
प्ताः दुःखेन लभ्यमन्त्र्यक्रमः विविधा विचित्रायायोगस्याष्टांगस्य कलाः स्वदभ्यासयुक्तीः स्वसात्मनोयः प्रतापो म
हिमा तस्य बलतो बलेन सामर्थ्येन परितेने विस्तारयामास ॥३९॥ ईदृशोरिति ईदृशो योगसिद्धिंगतैः स्वभाव्यानमा

अस्तताभिहगताः समयेन दुर्लभा विविधयोगकलापः ॥ स्वप्रतापबलतः परितेने संसृतिच्छिद्दरचारुचरित्रः ॥३९॥
ईदृशैर्यतिपतिः स्वविरेजे स्वाश्रितैः परिवृतो मितशिष्यैः ॥ तारकैरिव निजावनदक्षः पूर्णशारदतुषारमरीचिः ॥४०॥

श्रितैः अमितात्मगणिताये शिष्याः स्वस्वधर्मपथे तत्रामितुमपराः प्रवृत्तनिवृत्तधर्मस्याततनास्तैस्तथोक्तैः परिवृ
तो वेष्टितः यतयो ध्यानयत्न लीलायो गिनस्तेषां पतिः स्वामी निजानां स्वाश्रितजनानाम् अवनेन रक्षणाविधाय ... रक्ष
णेदक्षो अतिनिपुणः स सहजानंदः तारकैः उडुभिः परिवृतः पूर्णः षोडशकलासंपन्नः शारदः शरद्भवो यस्तुषारमरीचि
तुषाराः हिमा मरीचयः किरणा यस्य स तथोक्तः ... मरीचिः किरणो भानुरुस्रः करः ... हिमदीधि

तिश्चंद्र इव विरेजे शुशुभे ॥४०॥ केचिदिति अत्रास्मिन्भूतले तस्य सहजानंदस्यावेक्षणं साक्षाद्दर्शनम् आप्ता लब्धाः
केचिज्जनाः तन्नूनादं धृतवतः सहजानंदस्य साक्षाद्दर्शनम् अलब्ध्वा अप्राप्ताः केचिज्जनाः तस्य सहजानंदस्य
ये संतः साधुपुरुषास्तेषामाश्रय एव परः प्रधानं येषां ते तथोक्ताः संतः दिव्यमप्राकृतं परं सर्वोत्कृष्टं यद्धर्मस्तस्य
तस्य पयोधौ समुद्रे हरिहृदयमेतदपरनामके तत्र तस्मिन्सहजानंदे अनिशं संततम् प्रेमगाढानुरागम् चक्रुर्विद
धुः ॥४१॥ नेतुमिति अदभ्राः बह्वी करुणा दया यस्य स तथोक्तः स सहजानंदः निजानि स्वकीयानि यानि संहननानि

केचित्तत्र तदवेक्षणमाप्ताः तत्सदाश्रयपरास्तदलब्धाः ॥ तत्र दिव्यपरधर्मपयोधौ प्रेम चक्रुरनिशं हरिहृत्से
॥४१॥ नेतुमेव निजसंहननानि संगतात्मचरणानुपयाति ॥ दिव्यपार्षदगणोरुपविष्टस्तानदभ्रकरुणः सवि
माने ॥४२॥ निजानि स्वानि गात्रं वपुः संहननमुरीरं वर्ष्म विग्रहः इत्यमरः तेषां प्रांते अवसाने निजभक्तप्राणप्र
याणसमये इत्यर्थः विमाने दिव्ये इति शेषः उपविष्टो निषण्णः सन् दिव्याः अप्राकृताः ये पार्षदाः निजभक्तास्ते
षां गणाः समूहास्तैस्तथोक्तैः सह संगतो मिलितः प्राप्तो आत्मनः स्वस्य चरणौ येस्तांस्तथोक्तान् तान्निजा
श्रितजनान् नेतुं तद्दिव्यं स्वधाम प्रापयितुम् उपयाति आगच्छति शेषः ॥४२॥ 

आत्मन इति स सहजानंदः तत्र तस्मिन्विमानकलापे उपवेशयितान् निषादितान् तान् भक्तजनान् दिव्यमप्राकृतम्
तपतां तपस्विनां आश्रयभूते केवलं चांद्रायणादिव्रतानि कुर्वतां अपि दुःसाध्यं अचिंत्यं अप्रतर्क्यं अलभ्यं
अधुना काम् न विद्यते अंतो देशकालाभ्यामवधिर्यस्य तत्तथोक्तम् अक्षरं धाम अक्षरसंज्ञकं पदम् आत्मनः स्वस्य
परमक्षरं दिव्यस्थानम् निमेषात् प्रापयामास तत्र तेषां स्वस्थानं सजनाः तपोयोगादिसाधनवंतः श्रेष्ठपुरुषास्तेषां मुमुक्षूणाम्
दुर्लभमनादिमायावरणरहितागतिर्गमनं तामनिमेष ॥४३॥ पावनमिति इत्थमुक्तविधम् अतर्क्यं तर्कागो
आत्मनः पदमलभ्यमनंतं तत्र दिव्यमुपवेश्यायितांस्तान् ॥ अक्षरं धाम तपतामपि निमेषात् नेषितसुदुर्लभगतिः सः ॥ अत्र
पावनं तदनुभावमतर्क्यं तस्य वीक्ष्य गतसंशयचेताः ॥ इत्यमाप जनता श्रयमेनो दुर्निवारणभयाधिनिरपसम् ॥४४॥

चरमपावनं श्रोत्रजनपवितारम् तस्य सहजानंदस्यानुभावं प्रतापम् वीक्ष्य दृष्ट्वा जनास्तदतिरिक्ता जीवास्तेषां स
मूहः संतानागतो विनष्टः संशयः यो अक्षरादिपदाधिपतिः सर्वकारणकारणं साक्षात्पुरुषोत्तमोऽस्ति स एवायं धृत
नराकृतिः सहजानंदोऽस्ति न वेति संदेहो येभ्यस्तथाभूतानि चेतांसि अंतःकरणानि यस्याः सा तथाभूता सती एनांसि
प्रायश्चित्तैस्यनानुपानि पापानि तत्कालाश्रयमंतराद्दुःखेन चांद्रायणादिव्रताचरणलक्षणेनापि निवारयितुम

 त्रात्कंचनद्वयं हृत्वा तं तमभीति स्वात्माधर्मिनः पीडा च तेषां निरासो विनाशो यस्मात्तं तथोक्तम् तान् निरासयति निवर्तय 
तीति तं तथोक्तं वा तस्य सहजानंदस्य आश्रयम् आप ।।४४।। दुर्गसंज्ञपुरे निवसन्तं श्रीलमसे इति तं तथोक्तम् रूप
जातोऽणिनिस्ताच्छील्ये इति श्रीलेणिनि ध्वांतमिति अत्रास्मिन् भूमौ तनुभृतां देहभाजां जनानाम् मुक्तये परमनिः
श्रेयसाय इति पूर्वोक्तप्रकारेण विचरन् नानादेशेषु व्रजन् सूरः सूर्य इव ध्वांतं तम इव सर्वं निःशेषम् अदृष्टमधर्मम्
स्वौजसा निजप्रतापेन क्षपयिष्णुः क्षपयितुं विनष्टुं श्रीलमसे इति तथोक्तः यद्वा त्रिभुवनश्रेतिस्तुतेः नुक्तसमुच्चया

ध्वांतमत्र विचरन्निति सर्वमुक्तये तनुभृतामिव सूरः ।। स्वौजसाद्दृष्टमसौ क्षपयिष्णुः प्राप दुर्गपुरभेदनमीनः ।।४५
तत्र लब्धजनुषोऽत्रितनूजन्नाप्तो भिलषितं मुनिवाराः ।। दुर्विधास्तमगमन्निव कोशात्तस्य तापमतुलं श्रुतवंतः ।।४६

र्थवकारेणाधात्वंतरादपीष्टमुत्विधाने छंदसी समुद्दतेः सन्त्वाज्ञाप्यायां तदप्राप्तिस्तथापि इष्टेतोवकृत्य मितिभाष्य
कृत्स्नात्तत्रापीष्टमुत्विहितः क्षपयिरण इति चौरादिकस्य धातोः प्रेरणार्थत्वेपि धातूनामनेकार्थत्वान्निवर्तनप
वृत्तिः ईनः सर्वनियमनसमर्थः असौ सहजानंदः दुर्गपुरभेदनं दुर्गाभिधनगरम् पूः स्त्री पुरी नगर्यो वा पत्तनं पुट
भेदनमित्यमरः प्राप ।।४५।। तत्रेति अत्रेर्ब्रह्मपुत्रस्य यस्तनूजः कृतो दुर्वासः संज्ञस्तस्य शापतः शापेन मनुजत्वनि ।।१३।।

धृतिलक्षणेन लब्धानि नृलोके प्राप्तानि जन्मनि देहा यैस्ते तथोक्ताः अतुलमनुपमं सर्वोत्कृष्टं मित्यर्थः तस्य सहजा
नंदस्य प्रतापं महिमानम् श्रुतवंतः आकर्णितवंतः मुनीनामृषीणां वाराः समूहाः तत्र तस्मिन् दुर्गपत्तने निवासिन
मितिशेषः अभिलषितमाप्तुमभीष्टम् तं सहजानंदम् दुष्ट्या विधाप्रकारः समृद्धिर्वा येषां ते दुर्विधा दरिद्रजना
निःस्वस्तु दुर्विधो दीनो दरिद्री दुर्गतोपि स इत्यमरः अभिलषितम् कोशात् अर्थराशिमिव कोशोऽस्त्री कुड्मले दिव्ये
त्राणेऽर्थौघे गृहे जनाधिपतियाद्वः अगमन् प्रापु ।।४६।। गता इति ते मुनिवाराः योगिनोऽष्टांगयोगादिसाधनवं

गतानेदीयस्त्वं समभिलषितं योगिभिरपि प्रभोस्ते सौहार्दं सततमवधृतामरत्यः ।। इदीयोगी योगास्य पतिपति
नात्तेन विदधुर्महासं सन्तेषां कुविदथ युता साश्रितत्तनैः ।।४७।। तोत्तनामस्तेषां निकरैः समूहैः समभिलषितं सम्प्र
गवांछितम् हरेः सकलजनविविधदुःखहरणात् श्रीजस्य सहजानंदस्य नेदीयस्त्वम तिशयेनांतिकं तस्य भावस्तत्त्वम्
अतिनिकटत्वम् द्विवचने सादिनां तिकस्यात्सादीयस्कन् अंतिकबाढयोर्नेदसाधाविति तस्य नेदादेशः सततम
जस्रम् गताः प्राप्ताः अनवधृतास्सन्ता अस्मस्मिस्सदति स्मिक्प्राकृतवस्कृत्तालेशतिः प्रीतिर्येस्ते तथोक्ताः सु सन्तः
गिरेव निग्रहानुग्रहसमर्थो वा तेषः हृद्ये यांते दंतोष्ठपागेगिरं सन्तनेयाचं ते स्तत्व प्रियत्वात् तनुयाचनेकर्मणएषाप्रर्व

पदादिति णत्वम् गीर्वाणा देवाः वह्निर्मुखाः क्रतुभुजो गीर्वाणा दानवारयः वृंदारका देवता नि पुंसि वा देवता स्त्रियामपि
समरः तेषां च पतयो धीन्द्राणीन्द्रब्रह्मादयस्तेषां पतिः स्वामी तेन तथोक्तेन तेन सहजानंदेन सह अनतिव्याप्येन दृढं स्थिरमपि
तिद्वितीयः छिनच्चनेसादिनेयसूत् स्कुनोहलादेर्लघोरिति कृकारस्य रादेशः कष्टरूपनोयस्य सकृत्कमित्रं तस्यभावः
सौहार्दं प्रतिज्ञाय प्रपन्नाय प्रियमर्थः कृरूच्छृद्वसोपात्रादित्वादन्प्रत्ययः अनुज्ञातिकादित्वादुभयपदवृद्धिः विदधु
श्चक्रुः अथ तत्सन्निधिवासप्राप्त्यनंतरम् कश्चित् कदाचित् आश्रिता नानादेशांतरायाताः शरणीभूता ये जनास्तेस्त

इति श्रीहरिसंभवे महाकाव्ये हर्यंकेककविश्रीमद्धविसानंदवर्णितेतत्सुतापाद्विवर्णितनामैकादशः सर्गः ॥ ११

योन्के सुतामिश्रितातेषां मुनिगणानाम् महासंसत् महासभा स्नात सबभूव आसेतितिङः नपुंसितिरूपकमव्ययं त्रिया
रिणी वृत्तमेतत् रसैरूद्वैश्छिन्नायमनसभलागः शिखरिणीतिलक्षणात् ॥ ४१ ॥ इति श्रीपदवाक्यप्रमाणपार
वारीणधुरीणविश्वनाथभट्टात्मजदीनानाथभट्टशिष्यश्रीपरमक्षवासुदेवश्रीसहजानंदस्वामिचरणकमलो
पासकगोपालानंदमुमुक्षतः प्रेरितमतिश्यासावटंकदयाशंकरात्मजश्रीहरिकृष्णैकभक्तभोलानाथभट्टकृतो
श्रीहरिसंभवकाव्यस्य विद्वज्जनाह्लादिमाख्यव्याख्यायामेकादशः सर्गः ॥ ११ ॥ लि० रावलजेवामेरात्री ॥ ॥१२॥
सं०१९५६ माघ दि २७ मे थाण